बहु प्राचीन काळथी आपणे त्यां संस्कृतमां पत्र-लेखन चालु छे. संस्कृत जे समये राजभाषा हशे, त्यारे तो बधो ज व्यवहार ते भाषामां थतो हशे, अने ते वखते पत्रो केवी रीते लखातां हशे, ते जाणवा माटे 'लेखपद्धतिः' (गायकवाड्झ ओरिएन्टल सिरीज, वडोदरा) नामे ग्रन्थ जोवा जेवो छे.

व्यवहारु पत्रोनुं स्वरूप उक्त ग्रन्थमां जोवा मळे छे. पण साहित्यिक दृष्टिए महत्त्व धरावतां पत्रोनुं संकलन तथा तेनो इतिहास हजी सुधी थयेल नथी. कोईके आ दिशामां अध्ययन करवुं जोईए, तो ख्याल आवे के आ प्रकारनुं पत्रलेखन केटला समयथी प्रवर्ते छे, अने तेमां सैके सैके के काळांतरे केवां केवां परिवर्तनो आवतां गयां छे.

पत्रसाहित्यनी वात करीए एटले सहेजे मेघदूत अने तेना अनुकरणरूपे तथा पादपूर्तिरूपे रचायेलां दूतकाव्योनुं स्मरण अवश्य थवानुं. आ खण्डकाव्योए पत्र-साहित्यने एक नवो ज वैभवी ओप आप्यो छे, एम कही शकाय.

आ साहित्यने समृद्ध बनाववामां जैन विद्वानोए पण घणो फाळो आप्यो छे, जेनी नोंध लीधा विना चाले नहि. संस्कृत दूतकाव्यो (विज्ञप्ति त्रिवेणी, इन्दुदूत, मयूरदूत, शीलदूत, सेवालेख, समस्यालेख इत्यादि) उपरांत, विज्ञप्ति पत्रो अने क्षमापनापत्रोनो विपुल जथ्थो, जे आपणा ग्रंथागारोमां तथा ज्ञानभंडारोमां उपलब्ध छे ते, आनो जळहळतो पुरावो छे. अलबत्त, घणीवार आ पत्रो मिश्रभाषा धरावतां होय छे, छतां तेमां संस्कृतनी प्रधानता / प्रचुरता तो होवानी ज.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्वाचीन जैन विद्वानोए पण पत्रव्यवहारनी अर्वाचीन पद्धति तथा भाषारीति वगेरेनो उपयोग-प्रयोग करीने मबलख पत्र-साहित्य नीपजाव्युं छे. क्यारेक गद्यप्रधान, क्वचित् मात्र पद्यमय, कदीक मिश्र पत्रो; तेमां पण छन्दो-वैविध्य, अलंकार-प्राचुर्य, रीतिवैलक्षण्य, आम विभिन्न मुद्रा उपसावतां पत्रो; क्यारेक मात्र आवश्यक वातचीत के संदेशानुं आदान-प्रदान करनारा पत्रो तो महदंशे साहित्यिक बोधथी प्रेराइने ज लखाता पत्रो; छेक १६मा शतकथी चालती आवेली, के पछी तेथीय पहेलेथी चालु थयेली पत्रसाहित्य-प्रणालीने अस्खलितपणे जीवंत राखता आ बधा पत्रो ए खरेखर तो संस्कृत साहित्यनी आधुनिको द्वारा उपार्जित समृद्धि ज गणावी घटे.

अहीं प्रस्तुत थतो पत्र ते आ परंपराने ज अनुसरतो एक रसप्रद पत्र छे. तेना पत्रलेखक छे आचार्य श्रीविजयलावण्यसूरि महाराज. वीसमी शताब्दीना प्रभावक अने प्रतापी जैनाचार्य श्रीविजयनेमिसूरिमहाराजना विद्वान शिष्यो पैकी एक ते विजयलावण्यसूरिजी. व्याकरण, तर्क, छन्द, अलंकार अने काव्य - आ तमाम साहित्यना विशिष्ट कोटिना विद्वान अने बहुश्रुत एवा आ आचार्यश्रीनी ग्रंथरचनाओ, टीकाग्रंथो तथा काव्यरचनाओ अनुपम छे. तेमणे ६० वर्ष पूर्वे संवत् १९९३मां, बोरसद(बहुरसद)थी, पोताना गुरुजी आचार्य श्रीविजयनेमिसूरिजी उपर लखेलो, पद्य-गद्यमय, श्लेषप्रधान विविध अलंकारोथी सभर आ पत्र छे. मूळ पत्र फुल्स्केप कही शकाय तेवां ७ पानामां, पेन्सिल वडे, लेखके स्वहस्ते आलेखेल होई तेने, तदनुरूप **"श्रीगुरुचरणानां चरणार्चायां सप्तदलं लेखकमलं"** एवुं नाम लेखके ज आप्युं छे. मूळ पत्रमां तो आ शीर्षकनी साथे ज पेन्सिल द्वारा, लेखके सात पांखडीओ दर्शावतुं कमल पण दोरी बताव्युं छे.

आ पत्रमां प्रारंभे पांच पद्योमां इष्ट-स्मरणपूर्वक गुरुवर्यनुं वर्णन अने तेमना प्रत्ये पोतानी विज्ञप्ति माटेनी भूमिका रचवामां आवी छे. त्यारबाद श्लेषगर्भित अने तेथी द्विअर्थी एवां घणां विशेषणो द्वारा गुरुवर्यने संबोधवामां आव्या छे. खूबी ए छे के श्लेषना माध्यमथी पोताना गुरु भगवंत पासे वर्तता साधुओनां नामो आमां वणी लेवामां आव्यां छे. वळी, श्लेषप्रचुर पदोनो बोध सुगमताथी थाय ते माटे लेखके पोतेज नीचे विस्तृत टिप्पणीओ पण लखी छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आ विशेषणो ए ज पत्रनुं हार्द छे. ते पूर्ण थतां ज आवे छे वृत्तान्त-निवेदनः जेमां पोते पांच साधुओनी कुशलतानुं तथा गुरुजीना सांनिध्यमांथी नीकळ्या बाद सुखपूर्वक बोरसंद पहोंच्यानी वात जणाववापूर्वक, चातुर्मास माटे खंभात, छाणी, भरूच, झगडिया इत्यादि क्षेत्रोना श्रावक-संघोनी विनंति होई पोते क्यां चातुर्मास करवुं ते माटे गुरुदेवनी आज्ञानी अपेक्षा व्यक्त करवामां आवी छे. प्रांते वळी बे पद्य छे, अने त्यां पत्र समाप्त थाय छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री गुरुचरणानां चरणार्चायां
# सप्तदलं लेखकमलम् ॥

लेखक : स्व. आचार्य श्रीविजयलावण्यसूरिः ॥

**॥ आशैशवशीलशालिने श्रीनेमीश्वराय नमोनमः ॥**

स्वस्ति **श्रीभृगुकच्छ**मच्छनगरं नित्यं पुनानं जिनं
गीतं गौतमगोत्रनेत्रगणिनाऽनीहं गुणानां गृहम् ।
लोकालोकविलोकिनं गतमलं लेखालयालीनतं
*नत्वा **श्रीमुनिसुव्रतं** व्रतिनतं वाणीविलासालयम्* ॥१॥

यस्मिस्तीर्थङ्कराणां शुभभवनततौ भावुकास्फालितानां
घण्टानां टङ्कृतिभ्यो दधति दश दिशो मञ्जुवाचालभावम् ।
धर्म्यैर्हर्म्यैर्युतं तं पदकजरजसा शोभमानं मुनीनां
देशं देशं विशेषं शुभवचनरसं यामदेशं महेशम् ॥२॥

पुनानानां नानानरवरनतानामनुदिनं
लुनानानां नानाभवप्रभवनानाघनिकरान् ।
धुनानानां रम्याननयनमातोऽम्बुजरमां
दधानानां नानानयनयनकान्तं प्रवदनम् ॥३॥

सुशीलालङ्कारं शिशुसमयतोऽलं कलयतां
निशाशेषेऽशेषैरसमशमशीतैः शमिजनैः ।
सदा संस्मर्याणामगणितगुणानां गृहधिया
सुधास्वादं स्वादुं वचनरसवारोपहसताम् ॥४॥

क्षमापालालीभिर्महितचरणानां चरणिनां
**तपोगच्छा**काशे दशशतकराणां च विमले ।
मुदा वन्दं वन्दं सुगुरुचरणानां सुचरणौ
शिशुर्**लावण्याख्यो बहुरसद**तो विज्ञपयति ॥५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयि गुरुचरणा भगवन्तः ?

[1]पुरुषोत्तमानां [2]**सुदर्शन**धराणाम्, [3]लोकबान्धवानां [4]सदात**पोदया**ञ्चितानाम्, [5]कल्याणक्षमाधराणां [6]सदा**नन्दनो**द्यानभुवाम्, [7]पाक्षिकधियाऽनालिङ्गितान्त - राणामपि [8]**विज्ञान**बन्धुराणाम्, [9]सदा**पद्मा**लापहारोल्लसितान्तराणाम्,

---

(१) पुरुषेषु उत्तमानाम् । पक्षे कृष्णानामिव, लुप्तोपमा, बहुवचनं गौरव-प्रदर्शनार्थम्, एवमन्यत्रापि विज्ञेयम् ।

(२) सम्यग्दर्शनं शोभनं, **विजयदर्शनसूरिं**, शोभनानि दर्शनशास्त्राणि वा विभ्रताम् । कृष्णपक्षे सुदर्शनं चक्रविशेषं क्षायिकसम्यक्त्वं वा बिभ्रताम् ।

(३) निष्कारणजगद्बन्धूनाम् । पक्षे *सूर्याणामिव ।

(४) सदा तपसा दयया च सहितानाम् । यद्वा सदा अतपेन शान्तेन उदयेन **विजयोदयसूरिणा** अञ्चितानां पूजितानाम् । सूर्यपक्षे सता विद्यमानेन उत्तमेन आतपस्य आतपनामकर्मण उदयेनाञ्चितानां सहितानाम् ।

(५) कल्याणं क्षमां च दधानानाम् । यद्वा कल्याणमया ये क्षमाधराः साधवस्तान् दधानानाम् । पक्षे सुवर्णपर्वतानामिव मेरूणामिवेत्यर्थः ।

(६) सतां आनन्दनस्य-आनन्दस्य यद् उद्यानम्-ऊर्ध्वगमनम् उन्नतिरिति यावत्, तद्भुवां तत्कारणानामित्यर्थः, यद्वा सदा नन्दनस्य **विजयनन्दनसूरेः** उद्यानभुवाम् उन्नतिकारणानाम् । मेरुपक्षे सदा नन्दनकाननास्पदानाम् ।

(७) पक्षिज्ञानेन, विरोधपरिहारे तु पक्षपातधिया एकान्तवादधिया वा ।

(८) पक्षिज्ञानबन्धुराणाम्, विरोधपरिहारे तु विशिष्टज्ञानबन्धुराणां **विजयविज्ञा-नसूरि**बन्धुराणां चेति ।

(९) सतां या आपद्माला आपत्पङ्क्तिस्तस्या अपहारे उल्लसितं हृदयं येषां तेषां तथा, यद्वा सदा पद्मस्य **विजयपद्मसूरेः** आलापहारैः सुन्दररचनारचितगेयैः उल्लसितं हृदयं येषां तेषां तथा । पदान्तस्थस्य तृतीयस्य पञ्चमे परे विकल्पेन पञ्चमो भवतीति दत्वमेवात्रादृतम् ।

---

* सूर्यशब्देन चात्र लोकप्रसिद्ध्या आधाराधेययोरभेदोपचारेण वा पार्थिव-मणिमयं तद्विमानं विवक्षितम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[१०]विबुधाधिपाना[११]**ममृत**रसिकानां [१२]**लावण्य**लीलालयानां [१३]**गीर्वाण**गिरा गेयगुण-गणानाम्, [१४]महावनभुवां [१५]**कास्तूरा**मोददानदक्षाणाम्, [१६]वि**भक्ति**घटितानां [१७]साधुपदानाम्, [१८]श्वेताम्बरमणीनां [१९]भव्य**कमल**विबोधकानाम्, [२०]भव्य**मान**सहि-तानाम्, [२१]प्रभाव**धन**राजितानाम्, [२२]**जीत**बन्धुराणाम् , [२३]प्रसन्नवदन**सोम**सुन्दराणाम्,

---

(१०) पण्डितेश्वराणाम् । पक्षे इन्द्राणामिव । (११) मोक्षरसिकानाम् । यद्वा अमृतो **विजयामृतसूरिः** रसिकः शुभाभिलाषचारी येषां तेषां तथा । इन्द्रपक्षे सुधारसिकानाम् । (१२) लावण्यस्य सौन्दर्यस्य लीलालयानां केलिनिकेतनानाम्, सौन्दर्यैकाश्रयाणामित्यर्थः, इन्द्रपक्षेऽपि अयमेवार्थः, यद्वा लावण्यस्य **विजयलावण्यसूरेः** लीलाया विद्याविनोदादिरूपाया आलयानामाधाराणाम् । (१३) इन्द्रपक्षे सुराणां वचसा, अन्यत्र संस्कृतभाषया **प्र. गीर्वाणविजय**वाण्या च । (१४) महतोऽवनस्य रक्षणस्य, यद्वा महानां सदुत्सवानां अवनस्य रक्षणस्य च भुवां भूमिकानां कारणानामित्यर्थः, पक्षे विशालवनभूमिकानामिव । (१५) कास्तूरस्य **प्र.कस्तूरविजय**सम्बन्धिन आमोदस्य हर्षस्य, वनपक्षे कास्तूरस्य कस्तूरिकासम्बन्धिन आमोदस्य सुगन्धस्य, दाने क्षमाणाम्, वनपक्षे मृगविशेष-घटितत्वं हेतुः । (१६) साधु पदं येषां तेषां तथा, पक्षे व्याकरणप्रसिद्धशुद्ध-पदानामिव । (१७) विशिष्टभक्तिगुणसहितानाम् । विशिष्टेन **भक्तिविजयेन** सहितानाम् । पदपक्षे स्त्यादिरूपविभक्तिसहितानाम् । (१८) श्वेताम्बरसम्प्रदाये सर्वोत्तमानाम् । पक्षे विशदगगनप्रकाशकानां रवीणामिव । (१९) भव्यप्राणि-रूपकमलेभ्यो विशिष्टबोधदायकानाम्, यद्वा भव्यो यः **कमलविजय**स्तस्य विबोधकानाम् । रविपक्षे भव्यानि यानि कमलानि तद्विकासकानाम् । (२०) भव्यजनमनोहितकारकाणाम्, यद्वा योग्य**मानविजय**सहितानाम् । (२१) **प्रकृष्टभावधनेन प्रभावरूपधनेन प्रकृष्टभावेन धनविजयेन** च शोभितानाम् । (२२) जीताख्यव्यवहारविशेषेण **जीतविजयेन** च बन्धुराणाम् । (२३) प्रसन्नतायुक्त-मुखरूपचन्द्रेण प्रसन्नमुखेन **सोमविजयेन** च मनोहराणाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[२४]**सुमित्रा**नन्दनानामपि [२५]अशत्रुघ्नानाम् , [२६]क्षमाकाशानां [२७]प्रशस्य**वल्लभ**कलितानाम्, [२८]प्रज्ञाप्रकर्षतोषित**वाचस्पति-तिलका**नाम्, [२९]साधुहंसानां [३०]**सुमौक्तिक**फल-चञ्चूनाम[३१]भि**राम**सन्मान**सम्पदं** गतानाम् , [३२]**जयन्तं** [३३]**मेरु**चितं [३४]सदाचार**दक्षं**

---

(२४) **सुमित्रविजय**स्य आनन्दसाधनानाम् , पक्षे **सुमित्राया दशरथ**भार्याया नन्दनानां पुत्राणामपि । (२५) **शत्रुघ्न**नामक-**सुमित्रा**भव-**दशरथ**सुतभिन्ना-नाम् । विरोधपरिहारे शत्रुवधप्रवृत्तव्यतिरिक्तानाम् । (२६) क्षमया क्षमागुणेन काशन्ते प्रकाशन्त इत्यचि क्षमाकाशास्तेषां तथा, पक्षे क्षमा-पृथ्वी आकाशं-गगनं तयोरिव । (२७) प्रशंसनीय**वल्लभविजय**सहितानाम् । पृथ्वीगगनपक्षे प्रकृष्टैर्महापरिमाणैः शस्यैः शसयोरैक्यात् सस्यैर्धान्यरूपै वल्लभैर्नक्षत्रैः क्रमेण सहितानाम् । (२८) प्रज्ञाप्रकर्षेण तोषिता वाचस्पतितिलकाः प्राज्ञशिरोमणयो यैः, यद्वा तोषितौ **तिलकविजयवाचस्पतिविजयौ** यैस्तेषां; तथा विचक्षण-त्वेनार्च्यत्वविवक्षया वाचस्पतिशब्दस्य प्राग्निपातः । (२९) साधुर्हंस आत्मा येषां तेषां तथा, यद्वा साधुषु हंसा इव साधुहंसा उत्तमसाधव इत्यर्थः, तेषां तथा, पक्षे राजहंसानामिव । (३०) शोभनानि यानि मौक्तिकफलानि मोक्षफलानि तैः, यद्वा शोभनो यो मौक्तिको **मौक्तिक( मोति )विजय**स्तस्य फलैः सत्प्रयोजनैः विदितानाम् । विद्याचञ्चुवदत्र चञ्चुप्रत्ययः, राजहंसपक्षे शोभनानि मौक्तिकफलानि मुक्ताफलानि यत्र तथाविधाश्चञ्चवो येषां तेषां तथा । (३१) अभिरामा मनोहरा या सन्मानसम्पद् साक्षरकृतबहुमानविभूतिः, तां तथा, यद्वा अभियुक्तो यो रामो **रामविजय**स्तेन सहितो यः सन्मानो बहुमानयुक्तः सम्पद् **सम्पद्विजय**स्तं तथा, राजहंसपक्षे अभिरामं मनोहरं सत् उत्तमं मानसं देवसरोवररूपं पदं स्थानं गतानां प्राप्तानाम् । (३२) जयं विजयं तं जगत्प्रसिद्धं यद्वा **जयन्तविजयम्** । (३३) मे रुचितमभिप्रेतं, मेरुवन्निचितं **मेरुविजय**सहितं च । (३४) सदाचारे प्रचारे दक्षं निपुणं सदाचारयुक्तं **दक्षविजयं** च दधानानाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दधानानाम् , [३५]सदा**यशोभद्र**ङ्गाणां [३६]सु**दैव**धाम्नाम् , [३७]हृदयङ्गमां [३८]**सच्चिदानन्दकनक**मालामादधानानाम् , [३९]**सुशीलजयपुण्यधुरन्धरविमल-विद्यामोक्षनन्दप्रियमहोदयगुण**साधुजनासेवितपादपङ्केरूहाणाम्, [४०]**हिमांशु**कलानां [४१]**शिवविशुद्धानन्दप्रेमकुमुद**विबोधनकृताम् ,

---

(३५) आयश्च शोभा च आयशोभम् । सतः प्रधानस्य आयशोभस्य द्रङ्गाणां पत्तनानामाधाराणा-मित्यर्थः, यद्वा सदा यशांसि च भद्राणि च यशोभद्रम् , यद्वा यशोभद्रं **यशोभद्रविजयं** गतानाम् । पक्षे सद् आयशोभं यत्र तादृशानां द्रङ्गाणां पत्तनानामिव । (३६) शोभनं दैवं भाग्यं धाम तेजो येषां तेषां तथा, यद्वा शोभनानां दैवानां **देवविजय**सम्बन्धिनां धाम्नामास्पदानाम् , नगरपक्षे शोभनानि दैवधामानि नृपसत्कमन्दिराणि देवतासत्कमन्दिराणि वा यत्र तादृशानाम् । (३७) हृदयदेशगतां मनोहरां वा । (३८) सन् यश्चिदानन्दो ज्ञानानन्दः स एव कनकमाला सुवर्णमयो हारः तां तथा, यद्वा पदैकदेशे पदसमुदायोपचारात् सन्त उत्तमा ये **चिदानन्दविजयानन्दविजय-कनकविजया**स्तेषां मालां पङ्क्ति समूहमिति यावत् । (३९) शोभनेन शीलेन जयेन पुण्येन च धुरन्धराः सुशीलनयपुण्य-धुरन्धराः, विमलो विद्याया मोक्षस्य च य आनन्दः स प्रियो येषां ते विमल-विद्यामोक्षानन्दप्रियाः, महोदया गुणा येषां ते महोदयगुणाः एवंविधा ये साधुजना उत्तमजनास्तैः, यद्वा **सुशीलविजयेन जयानन्दविजयेन पुण्यविजयेन धुरन्धरविजयेन विमलानन्दविजयेन विद्यानन्दविजयेन मोक्षानन्दविजयेन प्रियङ्करविजयेन महोदयविजयेन गुणचन्द्रविजयेन** च मुनिजनेन, आसेविते पादपङ्केरुहे येषां तेषां तथा । (४०) हिमांशुश्चन्द्रस्तद्वत् कलानां मनोज्ञानाम्, यद्वा हिमांशुना **हिमांशुविजयेन** कलानां मनोज्ञानाम्, पक्षे हिमांशोश्चन्द्रस्य याः कलास्तासामिव । (४१) शिवस्य मोक्षस्य विशुद्धो य आनन्दः तत्र यत् प्रेम तदेव कुमुदं चन्द्रविकासि कमलं तस्य विबोधनकृतां विकासकानाम्, यद्वा **शिवानन्दविजय-विशुद्धानन्दविजय-प्रेमविजय-कुमुदविजयेभ्यो** विशिष्ट-बोधदायकानाम् । चन्द्रकलापक्षे शिवस्य महादेवस्य विशुद्धो य आनन्दः प्रेम च ते एव कुमुदे तयोः विबोधनकृतां विकासकानाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[४२] **निरञ्जनशुभरत्नप्रभोद्योतलक्ष्मीविद्यापरमप्रभाधिकस्वयम्प्रभो**ल्लासिनाम् , [४३] सुखास्पदानां [४४] सूर्यादिकलाधरसुमङ्गलबुधेज्यकविमतल्लिकामन्दचरणग्रह-साधुसेवितानाम् । चेतनचिन्तामणीनां मानवकामगवीनां जङ्गमकल्पतरूणां तत्र भवतां शुभवतां भवतामकम्पानुकम्पासम्पाततो वयं पञ्चापि कुशलिनः। [४५] नानाचरणपचरणबहुलताऽपाकृतसंतापातः सन्निधानोद्यानावनितः प्रस्थितोऽपि भवदीयबाहुच्छायापरिगृहीततया नानाविधाश्चर्यनिधानानि मेदिनीदलानि विलोक्य तत्र तत्र जिनेन्द्रपादांश्च प्रणम्य सुखेनात्रागतवान् ।

---

(४२) निरञ्जनं कलङ्करहितं शुभं यद् रत्नं तस्य यः प्रभोद्योतः किरणप्रकाशस्तस्य सकाशात्, एवं लक्ष्मीविद्याया द्रव्योपार्जनकलाया या परमप्रभा परमविकास-स्तस्याः सकाशात् अधिका या स्वयंप्रभा आत्मनैव न तु बाह्यभावेन प्रकाशनीया प्रभा तदुल्लासिनाम् , यद्वा **निरञ्जनविजयस्य शुभंकरविजयस्य रत्नप्रभविजयस्य उद्योतविजयस्य लक्ष्मीप्रभविजयस्य विद्याप्रभविजयस्य परमप्रभविजया-धिकस्य स्वयम्प्रभविजयस्य** च उल्लासिनां हर्षदायकानाम् । (४३) सुखानां दुःख-प्रतिकूलानाम् आस्पदानाम् पक्षे शोभनं खं गगनं तद्रूपास्पदानामिव । (४४) सूरय आदयो येषां पक्षे सूर्य आदि येषां ते सूर्यादयः; कलाधरा विज्ञान-विशेषकुशलाः, पक्षे कलाधरश्चन्द्रः; शोभनानि मङ्गलानि यैर्येषां वा, पक्षे शोभनो मङ्गलो भौमो यत्र ते सुमङ्गलाः; बुधैरिज्याः पूज्याः, पक्षे बुधगुरू; कविमतल्लिका उत्तमकवयः, पक्षे उत्तमशुक्रः; अमन्दोऽमन्दस्य वा चरणस्य चारित्रस्य ग्रहो ग्रहणं येषां ते अमन्दचरणग्रहाः, एवंविधा ये साधवो मुनिजनास्तैः सेवितानाम्, पक्षे मन्दचरणः शनैश्चरः; ग्रहा उक्तस्वरूपा नव खेटास्तैः साधु सम्यक् सेवि-तानाम् । (४५) नानाविधा ये चरणपा मुनिवरास्तेषां चरणस्य चारित्रस्य या बहुलता अधिकता तया अपाकृतः सन्तापो यत्र ततः, पक्षे नानाविधा ये चरणपा वृक्षास्तेषां चरणैः शाखाभिः बहुलताभिरनल्पवल्लीभिः अपाकृतः सन्तापो यया ततः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्च चतुर्मासीकृते **स्तम्भनपुर-छायापुरी-भृगुकच्छ**निकटग्राम-ग्रामीणग्रामनिविवत्सित**झगडिया**प्रभृतीनां श्रमणोपासका अतीवाभ्यर्थनां कृतवन्तः, **स्तम्भननगर**निवासिनः पुनः पुनरायान्ति, अस्मिन् विषये श्रीमतां श्रीमती आज्ञैव प्रमाणम् । सपरिवाराणां पूज्यानां श्रीमतां **विजयनन्दन-सूरिकुञ्जराणां** च तनुलताकुशलोदन्तमभिलषामि । किङ्करार्हं किमपि कार्यं कृपयाऽऽदेश्यम् । शिक्षावचनसुधासारैः सिञ्चनीयोऽयं जनः ।

३ ९ ९ १
अनलनिधिनिधीन्दुज्ञापिते विक्रमाब्दे
मधुबहुलनवम्यां मङ्गलेऽलेखि लेखः ।
**बहुरसद***रसातो लादिना किङ्करेण*
प्रतिवचनप्रतीक्षादत्तचित्तेन मङ्क्षु ॥१॥

वचनविरचनेऽस्मिन् गद्यपद्यानुयाते
विनयपथमतीतं बाललीलानुविद्धम् ।
सकविकथितदोषं श्लेषलेशानुसारे
किमपि च कठिनं वा क्षम्यमेतत् क्षमेशैः ॥२॥

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्री सहजकीर्ति उपाध्याय रचित
# श्री पार्श्वनाथ महादंडक स्तुति ॥

- प्रद्युम्नसूरि

विविध छंदोमां स्तुति-स्तोत्रो रचवानी परंपरा बहु जुनी छे. तेमां प्रचलित वसंततिलका, मंदाक्रान्ता, शिखरिणी, शार्दूला वगेरे छंदोमां तो खूबज स्तुति-स्तोत्रो मळे छे. ज्यारे दंडक छंदमां रचेला स्तुति स्तोत्रो अल्प मळे छे. शोभन मुनिवररचित चर्तविंशति स्तुतिमां छेल्ली महावीरप्रभुनी स्तुति दंडक छंदमां छे.

आ दंडक छंदना पण अनेक प्रकार छे. आ रीतना प्रकारो अन्य छंदमां आवता होय तेवुं जोवामां नथी आवतुं. तेमां जेम तेनुं स्वरूप गणवृद्धिथी वधे तेम तेनां नाम बदलाय. एक अक्षरथी लइ नवसो नव्वाणुं अक्षर सुधीना दंडक आवे छे. ते बधाना अलग अलग बंधारण प्रमाणे उद्दाम-शंख-संग्राम-मत्तमातंगलीलाकर-चंडवृष्टिप्रपात वगेरे नाम आपवामां आव्या छे.

प्रस्तुत दंडक श्रीपार्श्वनाथभगवाननी स्तुतिरूप छे. कर्ता श्रीसहजकीर्ति उपाध्याय आने **महादंडक** कहे छे. ९९९ अक्षरनुं एक चरण आवा चार चरणनो एक श्लोक. आथी मोटो दंडक न होइ शके. तेथी तेनुं महादंडक नाम पण सार्थक छे. एक रीते तो आ **मतमातंगलीलाकर**ना लक्षणमां बंधबेसे छे. तेनुं लक्षण आ प्रमाणे छे :

यत्र रेफान् कवि: स्वेच्छया पाठसौकर्यसापेक्षया
योजयत्येष धीरै: स्मृतो मत्तमातङ्गलीलाकर: ॥

रचना अत्यंत प्रासादिक छे. विषय तरीके श्रीपार्श्वनाथभगवानना जीवनने आमां समाव्यो छे. पांच कल्याणकनुं विशद वर्णन, कमठे करेला उपसर्गनुं वर्णन, कलिकुंड तीर्थनी स्थापनानो प्रसंग तेनुं वर्णन आ बधु खूबज प्रांजल शैलीमां अर्थ वांचतां वांचता ज बोध थतो जाय तेवी सुगम शब्दावलिमां अहीं मळे छे. संस्कृत भाषा परनुं तेमनुं प्रभुत्व नोंधपात्र छे. तेनुं कारण तेओनुं व्याकरण अने कोष बन्नेनुं तलस्पर्शी जणाय छे. तेओए सारस्वत व्याकरण उपर वृत्ति रची छे अने एक स्वतंत्र व्याकरणनी रचना पण करी होय तेम लागे छे. नाम ससद्वीपिशब्दार्णवव्याकरण एवुं मळे छे. अने बीजुं नाम ऋजुप्राज्ञव्याकरणप्रक्रिया ए नामनो पण ग्रंथ रच्यो होय तेम जणाय छे. वळी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एक अभिधानचिंतामणीनी जेम छ कांडमां विस्तरेलो नामकोश पण तेमने रचेला ग्रंथोनी यादीमां नोंधायो छे. वळी व्याकरणविषयमांज एकादि शतपर्यन्तशब्दसाधनिका नामनी पण रचनानुं नाम मळे छे. आ रीते व्याकरण, कोष अने साहित्य तेमना खूब खेडायेला विषयो जणाय छे अने तेनो आ रचनाने भरपूर लाभ मळ्यो छे. वि.सं. १७८३नी आ रचना छे.

जेसलमेरना श्रीपार्श्वनाथभगवाननी आ स्तुति छे. आ प्रभुजीनी प्रतिष्ठा आचार्यश्रीजिनकुशलसूरिजी महाराजे करी छे.

आ महादंडक स्तुतिना कर्ता उपाध्याय श्रीसहजकीर्तिमहाराजनी गुरुपरंपरा आ प्रमाणे स्तुतिना अंतमां आपी छे : श्रीरत्नसार शि. रत्नहर्ष शि. हेमनन्दन शिष्य उपाध्याय श्रीसहजकीर्ति.

तेमना ग्रंथोनी यादीमां एक नाम महावीर स्तुति वृत्ति - एवुं एक नाम मळे छे. आ महावीर स्तुति पण कोइ विशिष्ट रचना हशे के जेना उपर तेओए वृत्तिनी रचना करी होय.

हस्तलिखित ज्ञान भंडारमां तपास करतां श्रीसहजकीर्ति उपाध्यायनी अन्य रचना मळे तो ते बहार आणवी जोइए.

प्रस्तुत कृतिनी अन्य प्रति मळी नहीं तेथी केटलांक स्थानो शंकित रही गया छे. बहु विचारना अंते आ एकवार तो मुद्रित करी देवुं जोइए तेवुं लाग्युं. अन्यथा आ छे ते पण क्यांक काळनी गर्तामां विलीन थइ जाय. तेथी आ स्वरूपे अहीं आप्युं छे.

आ स्तोत्र पंडित श्रीअमृतभाई मोहनलाल भोजक द्वारा प्राप्त थयुं छे तेनो सानंद उल्लेख करुं छुं.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## ॥ श्री पार्श्वनाथाय नमः ॥

विदितनिखिलभावसद्भूतभूतप्रभूताखिलज्ञानविज्ञानभास्वत्प्रभाकीर्ति-सन्दोहसौभाग्यभाग्योल्लसल्लोककोकस्थितिश्रेणिसन्तोषपोषप्रदं प्रीतिनीति-प्रमाणप्रमाणप्रमेयक्षमालीनपीनध्वनिध्वानसम्मोहविध्वंसदक्षं जिनं पोषमासादिमाया दशम्या दिने प्रा(१००)प्तजन्मानमालोकशोकापनोदाय सम्प्राप्ततारुण्यकं प्राप्तबोधं सुरेभ्यो सुरज्येष्ठलोकान्तिकेभ्यो दिने पोषमासा-दिमैकादशीसञ्ज्ञकेऽवाप्तदीक्षं स्फुरत्स्वर्गि-पातालवासि-स्फुट-व्यन्तराधीश-सच्चन्द्रसूर्यारसौम्या-ऽमरा-चार्यवर्यो-शनः-शौरि-नक्षत्रमाला-नभस्तारका कोटि(२००)कोटिक्षितिप्रीतिभूपालसच्चक्रवालानतांह्रिद्वयं द्वेषिकृद्द्वेषसंहार-सञ्चारसंसारपाथोधिसम्मग्नचेतः-प्रवृत्त्यङ्गिनिस्ता-रकोद्वेगवेगप्रपञ्चक्षयाक्षीणलेश्यं सकोपासुरामर्षसम्भूतभीतिप्रदाशेषवि-द्वल्लताक्षोभशोभारटद्घोरसंहारकल्पक्षमाकाशभे(३००)दावकाशच्युतश्या-मरुग्नीरधिध्वानगर्जज्जितानेकमर्त्यप्रचण्डप्रतापद्विपाष्टापदध्वानदुष्टान्धकार प्रचारोच्छलन्नीरकल्लोलमालाम्बुदोद्रेककृसमापूर्णसर्वाङ्गमाज्ञाय सर्वप्रभाराजि-बिभ्राजमानप्रमाणर्द्धिपाताललक्ष्मीसदाभोगसंयोगविख्यातनामा(४००) भिरामप्रभावोऽमितायामविष्कम्भसम्मोददायिप्रणष्टाहितध्वान्तसंरम्भ-रम्भावलीचूतसच्चम्पकाऽशोकवृक्षादिनिःसङ्ख्यवृक्षातिशायीष्ट-शोभाभरानेकवादित्रनादोच्चयानन्दकृत्पञ्चवर्णात्मकावांसलक्षाधिपत्यं दधद्देवदेवीमनोवाञ्छितार्थं ददत् स्वीयसिंहास(५००)नोत्कम्पतो ज्ञान-सम्भारतश्चापि नागाधिपः स्वीयदेवेन्द्रताप्राप्तिहेतुं प्रभुं भूरिसौख्यं क्षमाकारणं चाकलय्य प्रमोदान्निजां पट्टदेवीं समादाय शीघ्रं जलोपद्रवध्वंसनाय स्थितं पुण्यमूर्तिं जगत्क्षेमकृन्नामधेयं प्रभुं **पार्श्वनाथं** समं निर्ममं चिन्मयं मेरुधीरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धरा(६००)नेकगाम्भीर्यधैर्यार्यसन्तोषपात्रं पवित्रं गुणश्रेणिभी राजितं त्यक्तसंसारसञ्चाररामारमाकारदेहस्थितिं प्रोल्लसद्धर्षसन्दोहमोहः फणानां सहस्रं व्यधान्मस्तकोपर्यलं छत्रसंकाशशोभाधरं वीरविक्षोभसंहारसम्बन्धिकं राजमानं चतुर्दिक्ष्वधोधः स्वकीयां(७००)शयोरा**श्वसेने**र्भवाम्भोधिनिस्तारकं कारकं सम्पदामास्पदं श्रेयसां साध्वसध्वंसदक्षं नतं नागरैः पद्मयुगं स्थापयामास भूयोऽथ पार्श्वाग्रतः सम्भ्रमाधिक्यतो नाटकं देवसूर्याभरीत्याप्सरःश्रेणि-भिर्दीयमानाप्रमाणोरुगानं कुमारीकुमारैर्जनानन्ददैर्दन्तसङ्ख्यैर्यु(८००)तं विश्रुतं सर्वतः सर्वपापप्रणाशप्रधानं निधानं गुणानां हितं सौख्यमोक्षप्रदं देवलोकेशता-चक्रवर्तित्व-शीरित्व-सभ्यार्धचक्रित्व-भूपत्व-सिद्धिक्षमा-कारणं दुन्दुभिध्वानरम्यं निधानाम्बुराशि प्रमाणाद्भुतातोद्यजातेः पृथक् सिद्धि-दिग्मानसङ्ख्यायुतैर्हारतुर्यैर्युतं (९००) पूर्णपुण्यौघलभ्यंचकारा-सुरेशश्रियं पावनां कर्तुकामस्ततः सप्तभिर्वासरै रात्रिभिश्चासुरैर्वर्षणे सर्वतः क्षीणभावं समेतेऽसुरं पापलेश्यं महावैरिणं **पार्श्वनाथस्य** पद्मावतीशो जगादेति सञ्जातरोषो महापापः(प-) दुष्टाधमेशाहमस्तोकशोकास्पदं त्वां नये(१०००)।

विहितजिनजलाशिवं कोऽस्ति रे प्राणभृद् यः समागत्य संरक्षति क्ष्मातलेऽद्यापि मूर्खोत्तमो वेत्सि किं नो जिनोऽयं चतुःषष्टिदेवेन्द्रपूज्य श्चिदानन्दभ(?)न्दस्वरूपः समाङ्गिव्रजप्रीतिदः सापराधेऽपि दुष्टाशये नैव रोषं विधत्ते जने जातुचिद् नाकिनि क्षुद्रसत्त्वे दयालीनचेताः (१००)सुखं वाञ्छति प्राणिनां भावतोऽथापहायाखिलं वैरभावं चिरारूढगूढं कृतक्लेशमान्द्या समाधिस्थितिश्लोकविध्वंसहेतुं भजागत्य चानन्तसंसारनीराम्बुधिप्रान्तमेहि प्रसिद्धोदयागारसंसारिशृङ्गारकल्पं मरुच्छाखिचिन्तामणिस्तोमसम्प्राप्ति-सन्तोषकल्पं गृहाणां ग(२००)णं सर्वसम्पत्तिभावस्य सम्यक्त्वरत्नं प्रयत्नेन वाक्यं हितप्रीतिकृत् तत् समाकर्ण्य चालोक्य तीर्थेशभक्तं महच्छक्तिभक्ति-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रभाशोभमानं धराधीश्वरं प्राप्तसंवेगभावोऽसुरो मेघमाली भवाब्धौ - पतज्जन्तुजातोद्धृतौ सावधानावनेकांकुशच्छत्रशङ्खाकृतिभ्राजमानौ जिनां (३००)ह्री प्रणम्यैवमूचे जगन्नाथ पापातपक्लेशसंवेशसङ्घातकद्वेषतोऽहं भवेष्वप्रमाणेष्वसद्दुःखसन्दोहरूपेषु तिर्यग्नरामर्त्यपापार्तिभृन्नारकेषु स्वयं सम्भ्रमस्त्राणभूतं भवत्सन्निभं क्वापि न प्राप्तवानीश सद्भाग्यतोद्य-श्रितानन्दचिद्रूपमासाद्य नाजन्म मुञ्चा(४००)मि सभ्यं भवन्तं कृपापात्रमश्ला-घ्यमाचीर्णमस्तोकवैरं च निन्दामि गर्हामि नैवं पुनर्वीतरागोत्तमः क्षीणपापो विधास्यामि नत्वे(त्वै)वमावेद्य च प्राप वेश्म स्वकीयं गृहीत्वा सुबोधिं ततो नागराजोऽपि जैनाग्रतो नाटकं देवशक्त्या विधायोरु नत्वा च शिश्राय सद्मश्रियं साङ्ग(५००)नः क्षेमकृत्**पार्श्वनाथो**ऽपि पातालनाथार्चितः प्राप्तशोभोऽभि-तोऽभिग्रहं पूर्णमासेव्य निर्जित्य चोपद्रवं नीरजं नीरजाभूमिपीठे विहारं विधत्ते स्म लोकोऽथ तत्र स्वभावेन मूर्तिं नवीनां तथा चैत्यमत्युच्चमानन्दकन्दं विधाय त्रिकालं समभ्यर्चयामास लोके ततस्तीर्थ(६००)मासीद्धितं सज्जनाना**महिच्छत्र**संज्ञं जनेष्टार्थसम्पादकं तीर्थनाथःप्रभुर्लोकनिस्तारको नीलवर्णो धरामण्डलं पावनं पादपद्मोच्छलद्रेणुसम्पाततः साधु कुर्वन् कलेः पर्वतस्यान्तिके शान्तिमूर्तिः स्थितः कायमुत्सृज्य नीरागतां संसृतेर्भावयन् भावितात्मा तथाभूतमा(७००)लोक्य तं तीर्थपं तन्निवासीकरी जातजातिस्मृतिः स्वं भवं पूर्वकं ज्ञातवानेवमालोचयामास चाहं जडो वामनो मन्त्रिपुत्रो भवं हास्यमानो जनैरेकदा मर्तुकामो मुधा बोधितः साधुना तापसोऽभूवम-स्तोककालं तपस्यां विधायान्तकाले शरीरं महन्मे तपस्याफलादा(८००)यतौ स्यादितीदं निदानं दधन्मानसे मृत्युमासाद्य जातो महाकायवान् कुञ्जरोऽत्र स्थले हारितो दुष्टचित्तेन पापेन नारो भवः पुण्ययोगात् पुनस्तीर्थराजो गुणानां निवासो मयाऽदर्शि नैनं विना प्राणिनां कोऽपि निस्तारकोदुःखसंहारकर्ता जनोऽन्यः क्षमामण्डलेऽयं च विज्ञाय (९००) ते मां समुद्दिस्य(श्य)

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निःसंशयं तारणायागतोऽत्राथ पूज्यो मया पूजनीयो यथाशक्ति भक्त्या यथाऽहं सुखी स्यां विमृश्यैवमानीय पानीयमच्छं तटाकात् तथा पङ्कजश्रेणिभिः पूजयामास **वामा**सुतं भावतो ज्ञातवार्तो जनाद्भूपतिस्तत्र चैत्यं चकार प्रभोरर्चयामास लोके ततः (२०००)।

सकलसुखदमिष्टमासेवनीयं जनैस्तीर्थमापद्वरं जातमेतत् **कले**रग्रतः **कुण्डं**संज्ञं ततः सोऽथ सम्यक्त्वरत्नान्वितो **मेरुतुङ्गा**भिधो हस्तिराट् पुण्यसार्थेशयुग् देवलोकं महानन्ददाय्यष्टमं प्राप शुद्धाशयस्त्यक्तवल्भः समन्ताद् जिनाधीशनिःसङ्गमूर्तिस्ततोऽन्यत्र भूमौ (१००) तपस्यां-व्यधादेवमाचीर्णशुद्धव्रतव्रातनाथोऽखिलः कर्मराशिर्महानन्त्यजन्यः क्षयं सर्वतो नीयमानो गुणस्थानरीत्या प्रधानेन शुक्लेन बिभ्राजमानोऽवलक्षे चतुर्थी दिने चैत्रमासस्य पूर्वाह्णकाले विशालं समग्रं जगज्ज्योतिरुद्योतकं-केवलज्ञानमासेदिवान् ज्ञात(२००)लोकत्रयालोकपर्यायकोऽगुप्तगुप्तप्रमादा प्रमादप्रसिद्धार्थसार्थप्रवेदी क्षणे तत्र देवा-ऽसुर-व्यन्तर-ज्योतिषां कम्पिता-कम्पसिंहासनानां स्वकीयर्द्धिसामान्यदेवीचलत्पत्ति-यानान्विता-नामभूदागमः कोटिकोटिप्रमाणाश्रितानां ततस्ते मिलित्वा जिनं चाभिवन्द्य प्रमो(३००)देन सालत्रयं रत्न-कल्याणरूप्यात्मकं चक्रुरुत्साहसंसक्तचित्ता अथो वीतरागो नमस्कृत्य तीर्थं स्थितः पूर्वदिक्सम्मुखो राजमानोऽधिकं देशनां धर्मरूपां जगज्जन्तुजीवातुकल्पामनल्पार्थजीवादिसंज्ञानमालां-विशालार्तिविद्वेषहालाहलध्वंसपीयूषनिस्यन्दतुल्यां (४००) शराग्निप्रमाणेन वाचां गुणेनाक्षयां देव-भूस्पृक्-तिरश्चां मनःसंशयोच्छेदपट्वीं स्वकीय-स्वकीयोरुभाषागतज्ञानभावेन निद्रा-बुभुक्षा-तृषोत्पत्तिनाशां ददौ-योजनाक्रान्तभूमिस्थितप्राणिनां श्रोत्रगामेवमेषोऽस्थिरो दुःखहेतुर्भवो यत्र जीवाः समे प्राप्नुवन्ति ध्रुवं जन्म (५००) मृत्युं जरां क्लेशमश्लोकमामं वियोगं तथा निर्धनत्वं मिथो वैरभावं विमातृत्व-मातृत्व-तातत्व-पुत्रत्व-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रामात्वमुख्यानि चिह्नानि भूयः परं नैव धर्मं कृताशेषसातं प्रमादेन कुर्वन्ति सम्मूर्च्छिता स्त्रीविलासाद्यसत्कर्मसु स्तोकसौख्येष्वनित्येष्वसत्कर्मबन्धे-ष्वथो प्राप्य चि (६००)न्तामणिप्रायचुल्लादिदृष्टांतदुःप्राप्यनृत्वं मनुष्याः ! कुरुध्वं प्रमादं विहायाशु धर्मं जनालम्बनं **पार्श्वनाथो**दितं मानवा एवमाकर्ण्य सञ्जातवैराग्यतः केऽपि दीक्षां ललुः केऽपि सम्यक्त्वरत्नव्रतानि स्वकायं पवित्रं विधाय प्रणम्याप्तनाथं च केऽपि स्वकीयं स्वकीयं गृहं शि(७००) श्रियुः प्रीतिभाजो नरास्तीर्थराजोऽष्टभिः प्रातिहार्यैः सदा शोभमानो विहारं विधत्ते स्म देवैः समं कोटिभिर्न्यूनभावेऽपि जाग्रद्यशावेदलोकप्रमाणैः शयैरातिपूर्वैश्चमत्कारमुत्पादयन् सर्वतः सर्वविश्वश्रियं पालयामास देवाधिदेवो महात्मा मुनीन्द्रो गुणानन्त्यभृत् क्षीण(८००)मोहो जितात्मा चिदानन्दरूपः कलावान् निरीहो जनानन्ददायी कलाकेलिकन्दक्षये कोलभूतः स्वधावाक् क्रियावान् जगन्मित्रतासेवधिः सद्विधिर्बान्धवः प्राणिनां भव्यभूतात्मनां शान्तिमूर्तिर्जगत्कीर्ति-लक्ष्मीवरस्तारकः पारगामी भवाम्भोधिमध्यस्य सभ्यार्चितः कर्मसम्मूलनो(९००)द्योगतीक्ष्णाशयो भारतक्षेत्ररत्नं जिनेशो मुनीनां सहस्राण्यथो षोडशप्रीतिभाजां सहस्रं तथा सिद्धिवह्निप्रमाणं-नतार्यार्यिकानां(णां) नराणां सुराणां तिरश्चां च कोटीश्च संरक्ष्य संसारतो भीतिहेतोः स्वयं ज्ञातनिर्वाणकालो दयालुः क्षमासागरः प्राप्तसर्वार्थसिद्धिः सुखी (३०००) ।

शिरसि शिखरिणः श्रिया राजमानस्य **सम्मेत**नाम्नः समागत्य कृत्वा च संलेखनां मासिकीं साधुभिस्त्र्युत्तरत्रिंशता राजमानो वलक्षेऽष्टमीवासरे श्रावणस्यार्धरात्रक्षणे क्षीणकर्मा विशाखास्थिते रोहिणीवल्लभे वल्लभो मोक्षलक्ष्म्या बभूव श्रितो जैनमुद्रामनङ्गो क्षयी सि(१००)द्धकार्योनिरालम्बनः सिद्धमध्यस्थितोऽनन्तचिद्दर्शनोऽनन्तसौख्यश्रितोऽनन्तसारात्मकोऽनक्षरूपारसः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्पर्शगन्धच्युत: सङ्गवेदोज्झितो देवनाथैर्मि-लित्वाऽथ सर्वैः कृतश्चन्द-नैर्देहदाहो जिनस्यास्थिराशि: क्षणादुज्झित:क्षीरनीराम्बुधौ पूर्वरीत्या समादाय दाढा: समां द्वीप(२००)नन्दीश्वरेऽष्टाहिकां जैनभक्त्या च निर्माय देवालयं शिश्रिये भक्तलोकस्तत: स्थापनार्हन्तमानन्द- सन्दोहहेत्वर्थमर्हत्समानं विधायार्चयामासुराजन्मकल्याणरत्नाश्मरूप्यादि- सद्द्रव्यजातै: पवित्रैर्विचित्रै: स्फुरत्कान्तिभि: शान्तपापं च तं समालोक्य भव्या अनेके नमस्य(३००)न्ति बोधिं लभन्ते श्रियं मोक्षलक्ष्मीं सुराज्यं शरीरं निरामं यश:कीर्तिसौख्यं च भव्यार्द्रनागार्जुनश्रीकुमाराद्यनेकाङ्गिवर्गा इव प्रीतिभाज: पुरे राजधान्यां तथा ग्रामजाते गृहे कोटिसङ्ख्यात्मके देशदेशान्तरे सर्वतो भ्राम्यता **पार्श्व**बिम्बान्यनेकानि दृष्टानि (४००) पुण्यानुभावात् समाकर्णितानि

३ ८ ७ १

प्रसिद्धानि च **स्तम्भना**दीनि संवत्सरे **लोकसिद्ध्यङ्गभूमि**(१७८३)**प्रमाणे** मया भाग्यतो जैनराजाज्ञया **जेसला**ख्ये प्रधाने च दुर्गे क्षमाधीश-सन्दोहगर्वापहारे महीमण्डलाक्षोभ्यसामर्थ्यरम्ये विपक्षैरगम्ये शरण्ये महद्धर्मशर्मप्रदं मोक्षल(५००)क्ष्म्या: पदं कृत्तसर्वापदंशस्थितिक्षेम-कृल्लोकशोकापहारि प्रमोदास्पदं चैत्यमुच्चं प्रभो: **पार्श्वनाथ**स्य दृष्टं सदिष्टं क्षमाकारणं पापसन्तापनिर्व्यापनेऽलंभयक्लेशनिर्नाशकं यत्र सर्वत्र बिम्बानि रम्याणि पुण्यानुयायीनि सन्त्यस्त-पापानि भूयश्चतुर्दिक्षु देवालयानां (६००) लघूनां द्विपञ्चाशदङ्गिप्रणम्यास्ति यत्राद्भुतैर्बिम्बचक्रै: सदा शोभमाना पुनर्यत्र **नन्दीश्वर**द्वीपवर्त्यार्हतागारसङ्ख्याकृतिर्वर्तते भव्यलोकैर्नता मुक्तिमार्गे यथा प्रोच्चमाङ्गल्यमालेव विभ्राजते तोरणश्रेणिरासाच्छबिम्बैर्युता माननीया महेभ्याङ्गिभिर्यत्र भाग्योद(७००)योद्रेकरूपं गुणानां गृहं मोक्षलक्ष्म्या: सुपुण्ड्रोपमं तोरणं द्वारवर्ति प्रदीपोपमं स्वर्गमार्गप्रदे मन्दिरस्याग्रत: शिल्पिभिर्निर्मिताभि: प्रशस्योत्तमै रम्यपाञ्चालिकाभिर्विचित्राभिरानन्ददाय्यस्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सत्सूरिमुख्याकृति-क्षेत्रपाला-ऽम्बिका शासनाधीश्वरीमूर्तिभी राजितं (८००) यत्र पार्श्वस्य पारङ्गतस्याच्छमूर्तिं चलत्पुण्यमूर्तिं सुरश्रेणितेजःश्रितं नागराजानुभावान्वितां कल्पवृक्षोपमां कामितार्थप्रदे मोक्षनिःश्रेणिभूतां **जिना**द्यन्त-**कौशल्य**सूरीशमुख्यैः प्रतिष्ठां सुनीतां महत्सूरिमन्त्रेण जाग्रत्प्रतापां विलोक्याच्छपात्रं प्रमोदस्य जातं मनः प्री(९००)तिभाग् मे सुलब्धो भवो मानुषोऽद्याथ हे नाथ ! विज्ञसिरेषा पदि(वि)त्रा महादण्डकेनाश्रिता तावकीना नवीना कृता **रत्नसारान्तिषदत्न हर्षो**ल्लस**द्धेम**सन्न**न्दनानां** प्रसादात् **स्वभावादिसत्कीर्ति**नाम्ना विनेयेन सभ्यं पदं वाचकं बिभ्रता सज्जनानां प्रमोदाय भूयाः सदा (४०००) ॥१॥

इति श्रीजेसलमेरुदुर्गस्थश्रीपार्श्वनाथस्य
महादण्डकमयी स्तुतिः समाप्तिमगात् ॥
॥ संवत् १७८३ ॥
श्रीसहजकीर्तिउपाध्यायरचितमिदम् ।

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# एक पत्र

**मुनि भुवनचन्द्र**

C/o. चुनीलाल मेगजी वोरा

मोटी खाखर - ३७० ४३५

कच्छ - गुजरात.

**ता. ५-४-९८**

आदरणीय संपादको,

अनुसंधान-११ नी लेखसामग्री वैविध्यसभर छे । मुद्रणमां विविध टाइप-साइझोनो उपयोग हवे थाय छे ते सारुं छे। एनाथी लखाणनुं एकधारापणुं तो टळे ज, ध्यानार्ह भागो झट नजरे पडे, विषय विभागो विशद थाय ।

पञ्चसूत्रना कर्ता विशे ऊहापोह करतो आ.श्री शीलचन्द्रसूरिनो लेख विद्वानोनुं ध्यान खेंचशे । जैन साहित्य अने जैन इतिहासनी एक अनिर्णीत बाबत आ लेखमां शास्त्रीय रीते चर्चाइ छे। पञ्चसूत्रना कर्ता अन्य कोई नहीं पण श्री हरिभद्रसूरि ज छे - ए विधानना समर्थनमां पुष्कळ आंतर-बाह्य प्रमाणो लेखके रजू कर्यां छे। वृत्तिना अंते "समाप्तं पञ्चसूत्रकं व्याख्यानतोऽपि" ए वाक्यमां आवता "अपि" शब्दनी चर्चा विचार करवा प्रेरे एवी छे। आ प्रकारनुं वाक्य टीकाकारनी कलममांथी कदापि टपकी शके नहीं अने 'अपि' शब्दनी उपयुक्तता अन्य कोई रीते स्थापित थई शके नहीं। आ वाक्य तरफ संशोधकोनुं ध्यान केम नथी गयुं ए वात नवाई पमाड़े एवी छे। गणधर-सार्ध शतकनी वृत्तिमां पञ्चसूत्रनो हरिभद्रकर्तृक तरीकेनो उल्लेख तथा उपाध्यायजी द्वारा 'धर्मपरीक्षा'मां थयेलुं विधान - ए बे पण सबळ प्रमाणो छे। बृहट्टिप्पनिकाना उल्लेखने सूक्ष्म दृष्टिए तपासीने लेखके काढेलो निष्कर्ष पण, अन्य प्रमाणोना प्रकाशमां, सुसंगत बने छे। लेखके आ संदर्भमां उत्पन्न थता अन्य आनुषंगिक प्रश्नोनी पर्याप्त विचारणा करी छे । भाषाकीय विचारणा पण थई छे । 'समराइच्चकहा'ना गद्य साथे पञ्चसूत्रना गद्यनी तुलना नथी करी, पण ए बन्ने ग्रन्थ जेमणे वांच्या हशे तेमने एक ग्रन्थ वांचतां बीजानुं स्मरण अवश्य थयुं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हशे। सांकळना अंकोडानी जेम एक पछी एक, श्रेणीबद्ध आवतां टूंकां वाक्यो ए श्री हरिभद्रसूरिनी गद्यशैली छे।

विषय, शैली अने भाषानी दृष्टिए श्री हरिभद्रकृत अन्य ग्रन्थो साथे पञ्चसूत्रनुं साम्य ऊडीने आंखे वळगे एवुं छे। पञ्चसूत्र जो पूर्वाचार्यनी कृति होय तो श्री हरिभद्रनी मौलिकता पुनर्विचारने पात्र ठरे। बीजी बाजु, तेओश्रीनी आगवी मुद्रा स्वयंसिद्ध छे। आ संजोगोमां पूर्वाचार्यकृत एक ग्रन्थनी छाया हारिभद्रीय विपुल वाङ्मय पर पडी एम मानवा करतां, हारिभद्रीय मुद्रा जेमां स्पष्ट अंकित छे ते कृतिने श्री हरिभद्रनुं ज सर्जन मानवुं वधु तर्कसंगत छे - लाघवभर्युं छे। एना समर्थनमां अन्य प्रमाणो जोईए, अने ते श्री शीलचन्द्रसूरिजीए एकत्र करी आप्यां छे। आ परिश्रम एक महत्त्वना प्रश्नना उकेल तरफ दोरी जशे एमां शंका नथी।

आ अंकमांनी सामग्रीमांथी पसार थतां जे कंइ नजरे चड्युं / सूझ्युं ते अहीं नोंधुं छुं।

चारूपमंडन श्री पार्श्वनाथस्तुतिना छेल्ला श्लोकमां (पृ. ५) प्रतिलिपि करती वखते अथवा बीबांगोठवणी वखते अक्षरो पडी गया छे। प्रथम चरण कंइक आ रीते होवुं घटे —

इत्थं स्तुतं सुयमकैर्यमकैरवेन्दुं . . . .

'हाल्लारदेशचरित्र'ना ४३मां श्लोकमां (पृ.४१) 'याम' शब्द छे ते हालारी/ काठियावाडी 'जाम'नुं संस्कृतीकरण छे। जामनगरना राजाओ 'जाम' कहेवाता।

'गणधरहोरा'नी वाचनामां केटलाक शब्दो सुधारवाना थाय छे। श्लोक ४ — 'गहणसन्नं'ने स्थाने शक्य पाठ 'गहाण सन्ना' — "ग्रहोनी संज्ञा" होइ शके। श्लो. ७ — "आरो य पइट्ठिओ" एम वांचवुं योग्य लागे छे। 'आर' मंगळना ग्रहनुं नाम छे। श्लो. ९मां, एटलेज, "आरो" साचो पाठ छे। 'आरा'नी कल्पना करवानी जरूर नथी। श्लो. १३ — "मण देवाणं" - अहीं 'मणु-देवाणं' होइ शके। श्लो. २०मां 'वलंतं' छे, ते 'जलंतं' होवानी पूरी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शक्यता छे। श्लो. १२मां 'जलंतं' आवे ज छे। श्लो. २३ – 'वणिविट्ठ' ने स्थाने 'विणिविट्ठा' कल्प्युं छे. परंतु 'व[य]णिविट्ठा' कल्पवुं वधु योग्य लागे छे।

'जिनपतिसूरिपंचाशिका' मूळ मात्र आपवामां आवी छे। कृतिपरिचय तो नथी ज, आवश्यक एवो प्रतिपरिचय / प्रतिनो स्रोत पण निर्दिष्ट नथी। संपादकोए आ बाबत आग्रह राखवो जोईए। गुरुभक्ति-रंजित आ रचना ऐतिहासिक दृष्टिए महत्त्वनी छे, साहित्यिक दृष्टिए रसिक छे। आवी सुंदर रचना घणी अशुद्ध रही गई छे, संशोधके हजी वधारे श्रम करवो जोइतो हतो।

श्लोक २ (पृ. ३२)ना प्रथम बे चरण आम वांची शकाय –

माणिमणं **व समुन्नय**-ममायिवयणं व सरलमभिवंदे।

श्लोक १८ (पृ. ३३) –

जं **सेसवे सयंवि** य मणं आसि तुह न चुज्जं।

जेणन्नवो(**बो**)हि(**ह**)णिज्जा . . . .

श्लोक २४ –

निदंइ **मं जणपुरओ** . . . .

श्लोक ४२मां एक महत्त्वनो शब्द खूटे छे –

विक्कमनरेसरा उ दसहिय (**सएसु** ?) गएसु वासाणं।

डॉ. नारायण मं. कंसारानो लेख, बीजी रीते उत्तम होवा छतां, 'अनुसंधान'ना व्यापमां ए आवे के केम-एवो सवाल उद्भवी शके। 'अनुसंधान'मां अनुसंधानात्मक-संशोधनात्मक सामग्री आपवानी मर्यादा इच्छनीय न गणाय? प्रकाशित थता प्राचीन साहित्यनी समीक्षा आ पत्रमां आपी शकाय, अने खास आपवी जोइए, परंतु अनुप्रेक्षा-प्रेरणा-विचार-विवेचन जेवी सामग्री अन्य पत्रो माटे छोडी देवी जोइए एम नथी लागतुं ?

**मुनि भुवनचं[द्र]**

★

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# Some Notes on the Bauddha Sahajayānī Siddha-Nātha Tradition

H. C. Bhayani

## 1. Saraha's मातृका-प्रथमाक्षर-दोहक in Apabhraṁśa

Mātṛkā or Kakka (The Alphabet) has been a favourite type or genre in early Indian regional literatures. In 1997 we edited and published its earliest known instance so far, viz. Bārahakkhara-kakka of Mahacandra Muni. A paper mostly based on its Introduction was read at the Eighth International Conference on Early Indian Regional Literatures, held at Venice in 1996. Therein we had drawn attention to the fact that in the biography of Gautama Buddha given in the Lalitavistara it is stated that when the teacher began teaching the Alphabet to the boy Gautama, he immediately recited verses in which the first words began with the letters of the Alphabet in their traditional sequence.

Now the Bārahakkhara-kakka was in post-Apabhraṁśa language and although we had listed the Mātṛkā poems known till now in Gujarati, Rajasthani, Hindi etc. no instance of an Apabhraṁśa Kakka was known. Somehow we missed one such Apabhraṁśa poem, that preceded Mahācandra's poem by several centuries and that was published as far back as 1957 ! Only quite recently I came to know about a Buddhist Sahajayānī Siddha's poem belonging to this genre. In his Dohākośa Rahul Samkrityayan has published (pp.129-139), on the basis of the Tibetan Tanjur (Stan'gyur), that is an old collection of Tibetan translations of Indian texts, the

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Tibetan translation of Saraha's Ka-kha-Dohā (from the Tantra Section of the Tanjur). The original Apabhraṁśa text is lost. Samkrityayan has given the Tibetan text in Nāgarī characters and has given its Hindi translation. Saraha's works are dated in the eighth century. I have no knowledge of Old Tibetan and I consider Samkrityayan's translation quite reliable.

Below I give some idea of Saraha's Mātṛkā poem. Like many poems of this genre its original was in Dohā metre. The Hindi translation of the Tibetan Colophon reads as follows : इति क-ख दोहा महायोगेश्वर श्री महान् ब्राह्मण सरहमुखोक्त समाप्त । कोसल देश-जन्मा महायोगी वैरोचनवज्र के मुख से कथित स्व-अनुवाद ॥ The poem had 34 Dohās. They covered the letters क to क्ष. In the introduction to the Bārahakkhara-kakka we have given information about the different alphabetical modes adopted by the various poems. Some follow the sequence of consonants only, others have verses beginning with syllables i.e. either each consonant followed by *a* and *ā*, while others have verses in which each initial consonant is followed in order by the whole series of vowels beginning with अ and ending with अः. The last type is known as बारह-अक्खरी. The earlier ones are known as ककहरा in Hindi or मातृका-प्रथमाक्षर-दोहक in Sanskrit. Saraha's poem was of the latter type. It seems to have each half of the Dohā in which the first word began with the consonants क etc. in sequence. The contents of the poem

Jain Education International For Private & Personal Use Only www.jainelibrary.org

pertains naturally to the Sahajayāna ideas and beliefs and it is in the familiar Sahajayānī terminology.

In the Ka-kha-dohā in each half of the Dohās the first word after the particular letter seems to have begun with the same letter.

1. कक्का : (a) कमल ; (b) कुमारी.
2. खक्खा : (a) ख-सम ; (b) खाहि.
3. गग्गा : (a) गगण ; (b) गमणागमण.
4. घग्घा : (a) घणघण ; (b) घरिणी.
5. ङङा : (a) निज सहाव ; (b) निरंतर.
6. चच्चा : (a) चउथ आणंद ; (b) चउ-खण.
7. छच्छा : (a) छड्डहो ; (b) छड्डि.
8. जज्जा : (a) जम्म-जरा ; (b) जसउ.
9. झज्झा : (a) झज्झ कुसुम (= बहु कुसुम) (?) ; (b) ______
10. xx xx xx xx
11. टट्टा : (a) (?) ; (b) टालमाल.
12. ठट्ठा : (a) ठवणि ; (b) _
13. डड्डा : (a) डोंबी ; (b) डमरु.
14. ढड्ढा : (a) ढलइ ; (b) ढलिअ.
15. णण्णा : (a) णिज-सहाव ; (b) णिज-घरिणी.
16. तत्ता : (a) ति-काय ति-गंथ ; (b) तुल्ल.
17. थत्था : (a) थिर करि ; (b) थाण.
18. दद्दा : (a) दुइ सरह हो वाय ; (b) दुइ बिंदु.
19. धद्धा : (a) धोबी ; (b) धोबिणि.
20. नन्ना : (a) नाणा-पआर ; (b) नास-भअ.
21. पप्पा : (a) पंच अमिअ ; (b) पउम-पुप्फ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

22. फफ्फा : (a) फडकार (?) ; (b) फडकार.
23. बब्बा : (a) बणह बंभपुफ्फ ; (b) बस-मज्झे.
24. भब्भा : (a) भग ही भग ; (b) भुंज.
25. मम्मा : (a) मइरा ; (b) मूल-चित्त.
26. यय्या : (a) जावहिं ; (b) जइसउ.
27. रर्रा : (a) रवि-ससि ; (b) रसणा.
28. लल्ला : (a) लेहु पवणहो ; (b) ललणा.
29. वव्वा : (a) वर वारि ; (b) वज्रजोइणि (?).
30. शश्शा : (a) सहाव ; (b) सरह.
31. षष्षा : (a) सहजे ; (b) सम-विसम.
32. सस्सा : (a) सम एउ सव्व ; (b) सहजाणंद.
33. हह्हा : (a) हास ; (b) हरहर.
34. क्ष-क्षा : (a) क्षले ; (b) क्ष-क्ष.

Saraha's Mātṛkā poem provides us definite evidence of there being an early tradition of writing such poems in Apabhraṁśa.

*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## 2. Were Śānti and Bhusaka the same or different ?

We know very well that regarding the identity, succession, chronology, life, authorship etc. of the Siddha-Nāthas there is so much disagreement among various traditional lists and legendary accounts, that largely we have to depend upon speculation and guess-work to separate facts and beliefs.

With respect to Śāntipāda and Bhusukapāda, we are faced with two problems : First, whether these were the names of the same person or of two different persons ? Second, who were they in their early life, prior to renouncing the worldly life ? In his treatment of Śāntideva's Śikṣāsamuccaya and Bodhicaryāvatāra, Winternitz has touched upon these problems on the basis of the traditional accounts and views of earlier scholars. I quote him below :

'As the most prominent among the later teachers of Mahāyāna Buddhism, who also shone as poets, we have to mention Śāntideva, who probably lived in the 7th century A.D. According to Tāranātha, he was born in Saurāṣṭra (in the present-day Gujarat) as a king's son, but was instigated by the goddess Tārā herself to renounce the throne, whilst the Bodhisattva Mañjuśrī, in the form of a Yogin, initiated him into the sciences. He acquired great magic powers, and was for a time the minister of King Pañcasiṃha, but finally he became a monk. He was a pupil of Jayadeva, the successor of Dharmapāla in Nālandā. Tāranātha ascribes to him

Jain Education International For Private & Personal Use Only www.jainelibrary.org

the works Śikṣā-Samuccaya, Sūtra-Samuccaya and Bodhicaryāvatāra.[1]

Now there are two pieces of evidence which so far have not come to the attention of the scholars, and which inditcate that there is some basis for the tradition that Śāntideva was a prince in his early life and that he was the same person who was called Bhusuku in several Caryās as their author.

In Caryā no. 41 Bhusuka is referred to as राउत्त (= राजपुत्र) (राउत्तु भणइ कटरि भुसुक्कु भणइ, verse no.5). The same is the case with Caryā no. 43 (भुसुकु / राउत्तु भणइ).

In the अपभ्रंश वचन given in the fifth issue of *Dhīḥ*, published from Sarnath, there is cited an Apabraṁśa passage (p. 34) from the Sekoddeśa-Commentary in which twice the names of Bhusuka and Śānti occur and there is

---

